# संस्कृतवार्ता:

दिनाङ्क : 23/08/2025 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य उक्तं यत् भारतम् सफलप्रौद्योगिकीषु द्रुतगत्या प्रगतिं कुर्वदस्ति।
- विदेशमन्त्रिणा डॉ. एस्. जयशङ्करेण उक्तं यत् भारत-अमेरिकादेशयोः व्यापारवार्ता अधुनापि प्रवर्तते; तेनोक्तं यत् सर्वकारः देशस्य हितरक्षणाय प्रतिबद्धोऽस्ति।
- उत्तराखण्डस्य चमोली-मण्डलस्य थराली-उपमण्डले गतरात्रौ मेघस्फोटेन व्यापकक्षति: अभवत्; आई.एम.डी. इत्यनेन अद्य पूर्वीय-राजस्थाने प्रचण्डवृष्टेः रेड्-अलर्ट् इति संचेतना प्रसारितास्ति।
- भारतीय-कम्पाउंड-पुरुष-कनिष्ठदलेन अद्य कनाडादेशे आयोजितायां विश्व-स्तरीय-धनुप्रतिस्पर्धायां स्वकीयं प्रथमं विश्वपदकं विजितम्।

---------------------------

<u>पीएम-स्पेस दिवसः</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य अवदत् यत् भारतम् सेमी-क्रायोजेनिक्-इन्जन्स् तथा विद्युत्-प्रणोदनम् इत्यादिषु सफलप्रौद्योगिकीषु द्रुतगत्या प्रगतिं कुर्वदस्ति, अपि च शीघ्रमेव गगनयानाभियानस्य आरम्भोऽपि करिष्यति इति। आगामिषु कालेषु भारतं स्वकीयम् अन्तरिक्षस्थानकं निर्मास्यतीति प्रधानमन्त्री दृढरूपेण अवोचत्। एकेन वीडियो-सन्देशमाध्यमेन प्रधानमन्त्रिणा राष्ट्रिय-अन्तरिक्ष-दिवसस्य अवसरे वैज्ञानिकान्, यूनः च समेत्य अन्तरिक्ष-क्षेत्रेण सम्बद्धेभ्यः सर्वेभ्यः शुभकामनाः प्रेषिताः।

श्रीमोदी अवदत् यत् अल्पावधौ एव राष्ट्रिय-अन्तरिक्ष-दिवसः यूनां मध्ये उत्साहस्य आकर्षणस्य च अवसरः अभवत् इति।

प्रधानमन्त्री अवदत् यत् अन्तरिक्षक्षेत्रं एकस्य अनन्तरं एकं नूतनं लक्ष्यं अङ्गीकरोति तथा च विगतेषु एकादशवर्षेषु सर्वकारेण अन्तरिक्षक्षेत्रे बहवः परिष्काराः कृताः सन्ति । श्री मोदी अवोचत् यत् भारते स्पेस्-टेक् अपि शासनस्य भागः भवति। प्रधानमन्त्रिणा उक्तं यत् अद्यत्वे अन्तरिक्षक्षेत्रे भारतस्य प्रगतिः सामान्यनागरिकाणां जीवनं सुलभतरं करोति इति ।

---------------------------

**जयशङ्करः**

विदेशमन्त्री डॉ. एस्. जयशङ्करः अवदत् यत् भारत-अमेरिकादेशयोः व्यापारवार्ता अधुनापि प्रवर्तते । तेनोक्तं यत् सर्वकारः देशस्य कृषकाणां लघुप्रवर्तकानाञ्च हितरक्षणाय प्रतिबद्धोऽस्ति। अद्य नवदिल्ल्यां पञ्चविंशत्यधिक-द्विसहस्रतमं ईटी-वर्ल्ड-लीडर्स्-फोरम् इत्याख्यं कार्यक्रमं सम्बोधयन् असौ प्रावोचत् यत् भारतं अमेरिकादेशेन साकं स्वसीम्नां विषये सुस्पष्टमस्ति सहैव स्वहितायैव निर्णयं ग्रहीष्यति । तैल-आयात-प्रतिबन्धविषये मन्त्रिणा प्रोक्तं यत् भारतं लक्षीकृत्य उपस्थापित-तर्कः चीनदेशोपरि नान्वेति। सः सबलं प्रोक्तवान् यत् गृहीतनिर्णयाः राष्ट्रहितायैव भविष्यन्तीति। तेन इदमपि प्रख्यापितं यत् सर्वकारस्य बलं देशस्य आत्मनिर्भरतामालक्ष्यैव वर्तते। डॉ. जयशंकरेण प्रोदीरितं यत् पञ्चाशदधिकवर्षेभ्यः सर्वसम्मतिः वर्तते यत् भारतं पाकिस्तानेन सह सम्बन्धेषु मध्यस्थतां नैव स्वीकरोति।

---------------------------

**चौहान-अन्तरिक्षदिवसः**

कृषि-कृषक-कल्याण-मन्त्री शिवराज्-सिंह-चौहानः अवदत् यत् भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्घटनेन (इस्रो) इत्यनेन एकं जियो-पोर्टल् विकसितम् अस्ति यत् अनावृष्टेः, वृष्टेः, वायुगुणस्य, अन्य-परिमाणानां च विषये यथार्थसूचनां प्रददाति, येन कृषकाः स्वसस्यानां योजनां अधिकप्रभावीरूपेण कर्तुं शक्नुवन्ति।

अद्य नवदिल्ल्यां आभासीय-माध्यमेन राष्ट्रिय-अन्तरिक्ष-दिवस-उत्सवस्य सत्रं सम्बोधयन्, सः कृषकाणां समर्थने भारतीय-अन्तरिक्ष-वैज्ञानिकानां योगदानस्य प्रशंसाम् अकरोत्।

---------------------------

## ऋतुविभागः

भारत-ऋतु-विभागेन अद्य पूर्वीय-राजस्थाने प्रचण्डवृष्टेः रेड्-अलर्ट् इति रक्तवर्णीया संचेतना प्रसारितास्ति। विभागेनोक्तं यत् आगामि द्वि-त्रि दिनानि यावत् दिल्ली-एन्. सी. आर., बिहार, झारखण्ड, छत्तीसगढ, पञ्जाब्, उत्तराखण्ड्, उत्तरप्रदेशेषु पृथक्-पृथक् स्थानेषु प्रचण्डतः अतिवृष्टेः सम्भावना विद्यते। विभागस्य अनुसारं सोमवासरात् आरभ्य गुजरातप्रदेशे अपि नूतनवृष्टिः अपेक्षितम् अस्ति। ओडिशा, तमिलनाडु, पुदुचेरी, कारैकल्, उत्तरप्रदेश्, पश्चिमवङ्गप्रदेशेषु च एतादृश्य: स्थितयः भविष्यन्ति। तमिलनाडु-तेलङ्गाना-राज्ययोः अद्य न्यूनत: मध्यमवृष्टि: भविष्यति इति विभागेनोक्तम् । पूर्वी राजस्थाने अत्यन्तं प्रचण्डवृष्ट्या कोटा, बुन्दी, बारां, सवाई-माधोपुर् इत्येतेषु मण्डलेषु जलप्लावनसदृश-स्थितयः प्रचलिष्यन्ति। अद्य राज्यस्य चित्तौडगढ-भिलवाडा-क्षेत्रयोः प्रचण्डवृष्टेः रेड्-अलर्ट्-सञ्चेतना प्रदत्ता अस्ति। एतदतिरिच्य, नवमण्डलेभ्यः नारङ्गवर्णीय-सञ्चेतना, अनेकेभ्यः मण्डलेभ्यः पीतवर्णीय-सञ्चेतना च प्रदत्ता अस्ति। बुन्दी-मण्डलस्य नैन्वा-प्रदेशे पञ्चाशत्-सेण्टिमीटर्-मितवर्षा अभवत्। उत्तराखण्डस्य चमोली-मण्डलस्य थराली-उपमण्डले गतरात्रौ प्रचण्डवृष्ट्यनन्तरं सम्प्रति साहाय्योद्धार-कार्याणि प्रचलन्ति। आकस्मिक-वृष्ट्या टुनरीनद्या: प्रवाहे वृद्धिः अभवत्। येन भग्नावशेषाः थाराली-विपणिक्षेत्रस्य कैश्चिद्भिः भागैः सह अनेकेषु गृहेषु प्रविष्टाः।

---------------------------

## लक्ष्यभेद-स्पर्धा

कज़ाकिस्तानदेशस्य श्यामकेंट-नगरे षोडशतमायां लक्ष्यभेद-प्रतिस्पर्धायां भारतीयलक्ष्यभेदकौ अर्जुन-बाबूता इलावेनिल-वालारिवन इत्येतौ एयर-राइफल-संयुक्तदल-स्पर्धायां स्वर्णपदकं विजितवन्तौ । एताभ्यां चीनदेशीयौ पेंग-शिनलू लू-डिंगके इत्येतौ सप्तदश-एकादशः इत्यङ्कान्तरालेन पराजितौ।

---------------------------

## धनुर्क्रीडा

भारतीय-कम्पाउंड-पुरुषकनिष्ठदलेन अद्य कनाडादेशे आयोजितायां विश्व-स्तरीय-धनुर्प्रतिस्पर्धायां स्वकीयं प्रथमं विश्वपदकं विजितम्। भारतीयस्पर्धालवः कुशल-दलालः, मिहिर-अपारः,गणेश-मणिरत्नम इत्येते जर्मनीदेशं त्रयस्त्रिंशदधिक-द्विशताङ्कस्य समानतायां सत्यां शूट्-आफ इत्याख्यायां निर्णायकस्पर्धायां पराजित्य जयं अलभन्त ।

---------------------------

## संस्कृत-साप्ताहिकी

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः श्वः रविवासरे मध्याह्ने सार्धैक-वादनतः भविष्यति। कृपया श्रृण्वन्तु।

।। इति वार्ता ।।